Volume IX, 2016 J. K. TIMES ISSN:2278-4047
A Multidisciplinary International Journal

# * धर्म युगे युगान्तरे च *

**राजेन्द्र-प्रसाद दास**

Department of Sanskrit, J. K. College, Purulia- 723101, West Bengal

Correspondence:Mob-+91 9933950328

**मर्मवाणी :**

धर्ममयमिदं जगत् । धर्मेण धृतं सर्वम् । धर्म च मूलं सर्वस्य । वैदिकयुगे वैदिकसाहित्ये यद्धर्मस्याभिव्यक्ति-र्लक्ष्यते तत् सनातनम् । अस्य धर्मस्य नामान्तरं श्रौतधर्म स्मार्तधर्म वेति । धर्मोऽयं वैदिकयुगस्य वैदिकसमाजात् क्रमेण आयाति , विचरति च युगे युगे , - विषयोऽयं लक्ष्यते स्पष्टरूपेण । अनिवार्यभावेन रामायणीय-युगेऽपि अस्य पक्षविस्तारो लक्ष्यते । परवर्तिकाले आधुनिकयुगेऽपि अस्य व्यतिक्रमो न लक्ष्यते इति ।

**मुख्य-शव्दावली :** धर्म , जगत् , समाजः , वैदिकयुगम् , रामायणीययुगम् , वैदिकयज्ञः , वैदिकदेवता , वैदिकधर्म , श्रौतधर्म , स्मार्तधर्म , सनातनम् , रामकथा , रामचन्द्रः , चतुर्वर्णः , चतुराश्रमः , कर्तव्यविधिः ।

**भूमिका :**

ख्रीष्टपूर्व-द्विसहस्रबर्षात् ख्रीष्टपुर्व-पञ्चशतबर्षं यावत् वैदिकयुगमिति मन्यते । अस्मिन् काले रचितं साहित्यं वैदिकसाहित्यमिति । साहित्यं समाजस्य दर्पणम् । वैदिकसाहित्यमपि न तस्य व्यतिक्रमम् । वैदिकसाहित्ये तय्युगीयसमाजस्य प्रतिफलनं लक्ष्यते । तस्माच्च ज्ञायते तय्युगीय-धर्मबिषयका कथा । वैदिकयुगे प्रचलितः धर्मः वैदिकधर्म इति उच्यते । धर्मोऽयं युगात् युगान्तरे च अनुसृतो भवति इति लक्ष्यते । धर्मविषयका कथेयं वर्तमान-निवन्धे आलोचनीया ।

आलोचना :-

वैदिकयुगस्य प्राचीनतमा रचना ऋग्वेदसंहिता । अत्र प्रथममण्डलस्य द्वाविंशसूक्ते लक्ष्यते - देवता विष्णुरेव सर्वलोकस्य मूलम् । भूलोकः अन्तरीक्षलोकः द्युलोकश्चेति लोकत्रयस्य स एव सर्वमयकर्ता । सर्वत्रव्याप्तत्वात् तन्नाम विष्णु इति । स एव सर्वलोकस्य धारकः, पालकः रक्षकश्चेति । अतः स एव धर्म इति । धर्मवलेन च स एव सर्वं धारयति पालयति च । प्रसङ्गोऽयं व्यक्तोऽत्र -

त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः ।
अतो धर्माणि धारयन् ।।

ऋक्-सं-१।२२।१८॥

धर्मशब्दस्य निर्वचनप्रसङ्गे संस्कृत-व्याकरणे तथा अभिधाने उक्तम्- धृञ्+मन्= धर्म । अत्र - धृञ्- धातोरर्थः- धारयति, पालयति, आश्रयं ददाति वेति । प्रसङ्गेऽस्मिन् अमरकोषे उक्तम्- धरति लोकोऽनेन, धरति लोकं वा, धरति विश्वम् इति, धरन्ति लोकान् ध्रियते वा जनैरिति । अर्थात् येन विधृताः सर्वे लोकाः, यमाश्रयति च लोकसमुहः - स धर्म इति ।

वैदिकधर्मप्रसङ्गः स्पष्टरूपेणाभिव्यक्तः स्मृतिशास्त्रे । याज्ञवल्क्यस्मृतिसंहितायां बिषयेऽस्मिन्नुक्तम्-

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।